योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७८

अष्टसप्ततितमः सर्गः ७८

श्रीवसिष्ठ उवाच ।

वातवर्षहिमोत्पातपातभग्ने धरातले ।

जडवेगोऽगमद्वृद्धिं कलाविव महीपतिः ।। १

गङ्गाप्रवाहपतितधारापातविवर्धितः ।

सरित्सहस्रैः सहसा मेरुमन्दरभासुरैः ।। २

आदित्यपथसंप्राप्तकन्दरो जडमन्थरः ।

एकार्णवः समुच्छून आसीन्मूर्ख इवेश्वरः ।। ३

विपुलावर्तवृत्त्यात्तविवृत्ताद्रिजरत्तृणः ।

स्फुरत्तुङ्गतरङ्गाग्रनिगीर्णादित्यमण्डलः ।। ४

मेरुमन्दरकैलासविन्ध्यसह्यजलेचरः ।

गलितावनिपङ्कान्तर्लीनव्यालमृणालकः ।। ५

अर्धदग्धद्रुमवनव्यूहशैवलसंकटः ।

त्रैलोक्यभस्मसंसृष्ट आसीत्कर्दमकुत्सितः ।। ६

नभःस्तम्भवृहद्धानोत्तालभास्करपुष्करः ।

धाराजालमहाम्भोदविलीननलिनीदलः ।। ७

डिण्डीरपर्वतप्रान्तनदद्दुन्मत्तवारिदः ।

भ्रमदिन्द्रानिलार्केन्दुपुरपत्तनपूरणैः ।। ८

काष्ठवत्प्रोह्यमाणोग्रसुरासुरजनोत्करः ।

शनैः क्रमोच्छूनतया लिहन्नादित्यमण्डलम् ।। ९

तरत्तारतरारावधाराधरसमुद्भवैः ।

बुद्बुदैः परिसंदिग्धप्रोह्यमाणमहाचलः ।। १०

भ्रमद्बुद्बुदविश्रान्तभ्रान्तकल्पान्तवारिदः ।

उत्तालैस्तैरनाधारैः पश्यन्नपरवारिदम् ।। ११

महाप्रवाहवार्योघघोषघुंघुमिताम्बरः ।

एकप्रवाहमहितसव्योमकुलपर्वतः ।। १२

चण्डवातकृतापूर्वजलौघकुलपर्वतैः ।

महाघुरघुरारावघर्घरोग्रमहारयः ।। १३

ब्रह्माण्डखण्डसंघट्टपरावृत्तिभिरुद्धतः ।

कुर्वन्योजनलक्षाणि वितातान्युन्नतानि च ।। १४

तृणैरिव तरङ्गेषु दोलान्दोलनमद्रिभिः ।

कुर्वद्भिरुपलाघातभग्नभास्करमण्डलः ।। १५

शून्यब्रह्माण्डविषुलजलघातकुलायके ।

नीलानचलकाकोलाञ्जहन्सलिलजालकैः ।। १६

मृतामृतमहद्भूतमज्जनोन्मज्जनाकुलान् ।

तरंगमकरावर्तप्रतिबिम्बान्वितानिव ।। १७

मृतशिष्टान्पुरभ्रष्टान्फेनाद्रितटिकोटिषु ।

दधज्जलबलश्रान्तांस्त्रिदशान्मशकानिव ।। १८

विपुलाद्यतनाकाशविपुलानम्बुबुदुदान् ।

सद्वस्रसंख्यान्कलयंल्लोचनानीव वासवः ।। १९

शरद्व्योमसमाभ्भोगैर्वलद्भिर्बुद्बुदेक्षणैः ।

पश्यन्निव नदीधारान्भेघानाताम्रपूरकान् ।। २०

पुष्करावर्तकाभ्राणां बहुभिर्वीचिमण्डलैः ।

कुर्वन्नालिङ्गनानीव सपक्षाद्रिवदुत्थितैः ।। २१

त्रिजगद्ग्राससंतृप्तः प्रगायन्निव घर्घरैः ।

स्वैर्नृत्यन्निव चोग्राद्रिकटकैर्वीचिदोर्द्रुमैः ।। २२

नदीधाराधरैरूर्ध्वे मध्ये दग्धैर्धराधरैः ।

अधो धराधरैर्नागैरधरः पङ्कगैर्वृतः ।। २३

धारात्रिपथगापूरैर्निपतद्भिर्निरन्तरम् ।

मग्नोन्मग्नो ह्यमानाद्रिशृङ्गडिण्डीरबुद्बुदः ।। २४

उह्यमानदलत्स्वर्गखण्डक्रन्दन्नभश्चरः ।

वहद्विद्याधरीवृन्दपद्मिनीसुन्दरान्तरः ।। २५

एकार्णवपयःपूरैर्घर्घरारावरंहसि ।

त्रैलोक्यखण्डसंहारे प्रोह्यमाणे महाम्भसि ।। २६

नासीत्कश्चित्परित्राता हन्ताऽवीचिवशोऽपि च ।

शक्नोति कः परित्रातुं कालेन कवलीकृतम् ।। २७

नाकाशमासीन्न दिगन्त आसी-

दधोऽपि नासीन्न तदूर्ध्वमासीत् ।

भूतं न आसीन्न च सर्ग आसी-

दासीत्परं केवलमेव वारि ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे उ० पा० एकार्णववर्णनं नामाष्टसप्ततितमः सर्गः ।। ७८ ।।